जैमिनिमहर्षिप्रणीतम्

# सङ्कर्षकाण्डम्

## अथ प्रथमाध्याये प्रथमः पादः

*अनुयजतीत्यनु[1]वषट्कारश्चोद्यते । (सि) ॥१॥

स द्रोणकलशादिज्येत, सर्वार्थत्वाद्यथाऽऽज्यार्था ध्रुवायाः । (पू) ॥२॥

विभक्तानि हवींषि तथा कर्माणि कर्मसंयोगात् पुनरिज्या । (सि) ॥३॥

लिङ्गदर्शनाच्च । (गु) ॥४॥

तन्त्रं प्रदानमेकदेवतत्वाद्यथा दर्शपूर्णमासयोः । (पू) ॥५॥

एककालं तु न भवत्येवेदं कालपृथक्त्वात् । (सि) ॥६॥

सवनभेदाच्च । (गु) ॥७॥

अनुशब्दार्थवत्वाच्च । (गु) ॥८॥

आवृत्तिं च दर्शयति । (गु) ॥९॥

एतेन भक्षा व्याख्याताः । (सि) ॥१०॥

शामित्रं [2]तीर्त्वोत्सृजेदिति [3]कार्ष्णाजिनिस्तन्त्रमध्रिगुपर्यग्निकृतानिति चोद्यते । (पू) ॥११॥

अनन्तरं वा पर्यग्निकरणात् किं प्रत्यक्षां श्रुतिमतिक्रामेद्यथा न प्रयाजा इज्यन्त इति नैकदेशप्रतिषेधः । (सि) ॥१२॥

---

1. The sūtra ms. commences with 'वषट्कार'. The portion 'अनुयजतीत्यनु-' is restored from the commentaries of Devasvāmin (*Dev.*) and Bhāskararāya (*Bh.*) and from the *pratīkas* of a few sūtras written on the flyleaf of the sūtra-ms. itself: '१३ अध्याये– अनुयजाति ।' etc.
2. The sūtra ms. has नित्यो for तीर्त्वो, and *Dev.* has तीर्थो. The correct form तीर्त्वो is from the *adhikaraṇa-pratīka* of *Dev.* and *Bh.*; this is also supported by the sense in the context.
3. Sūtra ms. reads कार्ष्णाजिनि; °जिनि, however, is the correct form.

---

*This sūtra is quoted in the *Vedāntakalpataru-Parimala* (*VKP*) of Appayya Dīkṣita (*Edn. Brahmasūtra-Śaṅkarabhāṣya*, with *Bhāmatī*, *Kalpataru* and *Parimala*, N. S. Press, Bombay, 1917) p. 838.

अग्निं चित्वा सौत्रामण्या यजेतेति तत्संयोगेन चोदनात् । (गु) ॥१३॥

चयनाङ्गं वा तत्संयोगेन चोदनात् । (गु) ॥१४॥

*क्रत्वङ्गं वा चित्वेत्यङ्गे नोपपद्यते यथैता एव निर्वपेदीजान इति । (पू) ॥१५॥

सा तदपवर्गे क्रियेत यथा संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति । (सि) ॥१६॥

अग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यादित्येतेन व्याख्यातम् । (सि) ॥१७॥

चयनाङ्गं वा विप्रतिषेधाङ्गदक्षिणा च रथन्तरे वरं ददातीति । (सि) ॥१८॥

अर्थवाद[1]सामर्थ्याच्च । (गु) ॥१९॥

योऽग्नि[ग्नि]नुयात्तं[2] दक्षिणाभी राधयेदि[त्ये]तेन व्याख्यातम् । (पू) ॥२०॥

क्रत्वङ्गं वा प्रयोगश्रुतिसंयोगात् । (सि) ॥२१॥

गुणचोदना वा प्रीत्याचिख्या सा । (सि) ॥२२॥

उल्मुकहरणे रक्षोपहननं श्रूयते तत्प्राजापत्येष्वावर्तेत कालपृथक्त्वात् । (पू) ॥२३॥

श्रपणार्थन्तु हरणं प्रातस्सवने पुनः साधारणं कर्म कृतम् । (सि) ॥२४॥

एतेन वपाया अग्रतः प्रत्याहरणं व्याख्यातम्, अविप्रतिषिद्धो हि तस्मिन् श्रपणार्थः । (सि) ॥२५॥

अभितो वपां जुहोतीति देशवादो, यथाऽभितो वृक्षं निधेहीति । (पू) ॥२६॥

कर्मवादो वा प्रकरणात् । (सि) ॥२७॥

लिङ्गदर्शनाच्च । (गु) ॥२८॥

अभितः पुरोडाशमाहुतिं[3] जुहोति । (सि) ॥२९॥

हविष्कृदेहीत्यध्वर्युरुच्यते प्रकरणात् । (सि) ॥३०॥

वाग्वा श्रुतिसंयोगात् । (पू) ॥३१॥

---

1. Sūtra ms. reads च for द.
2. Sūtra ms. reads योऽस्याग्निनुयात्तं.
3. *Dev.* reads आहुतिः for आहुतिं.

---

*Sūtra quoted by Śambhubhaṭṭa in his *Prabhāvalī* (Com. on Khaṇḍadeva's *Bhāṭṭdīpikā*), Edn. N. S. Press, 1921, p. 312 a.

पत्नी वाऽविधानात्। (सि) ॥३२॥

यः कश्चिद्वा निर्वचनात्। (सि) ॥३३॥

एतेषां वा वाक्यसन्निधानात्। (सि) ॥३४॥

सर्वकर्मणां दैवी हविष्कृद्देहीत्यविशेषेण श्रूयते। (पू) ॥३५॥

*अवहननार्थी[1] वा यथा पत्नीतुल्यः श्रूयते। (पू) ॥३६॥

अर्थवादमात्रं वा वाचो हविष्कृतं[2], यथाऽश्विनोर्बाहुभ्यां निर्वपामीति। (सि) ॥३७॥

[3]मनुष्याश्शमितारो वाक्यसन्निधानात्। (पू) ॥३८॥

ऋत्विजो वा सन्निधानं नयने श्रूयते[4] शामित्राख्यां लभेरन् यथोद्गातारः। (सि) ॥३९॥

[5]अन्यो वा शमिता[6] सर्वकर्मणां [7]शेषात्। (सि) ॥४०॥

श्रुतिभूतेष्वध्वर्युर्वेदसमाख्यायोगात्। (सि) ॥४१॥

[8]संज्ञापने च शमनसंयोगात्। (सि) ॥४२॥

लिङ्गदर्शनाच्च। (गु) ॥४३॥

॥ [इति] सङ्कर्षकाण्डे प्रथमस्य प्रथमः पादः ॥

---

1. *Dev.* नार्थे.
2. *Dev.* कृत्वं.
3. In *Bh.* the order of the sūtras 38 and 39 is interchanged; and नयने is given as the *adhikaraṇa-pratīka.*
4. *Dev.* नयने च श्रूयते. *Bh.* commences the sūtra with नयने.
5. *Dev.* अन्यो वा omitted; *Bh.* शमितान्यः.
6. Sūtra ms. has only त for ता.
7. *Dev.* विशेषात्.
8. The sūtra ms. omits this sūtra and numbers the next sūtra as 42. The sūtra is restored from *Dev.* and *Bh.*

---

*This sūtra is quoted by Śabara in his *Bhāṣya* on *Mīmāṁsāsūtra* XII. ii. 11, though in printed editions it is wrongly understood and punctuated, the first part of the sūtra being taken with the previous sentence of the *Bhāṣya;* there is also a variant reading. The printed editions read :- °अवहननार्था वा। यथा पत्नीवत् तुल्यवच्छ्रूयते इति **सङ्कर्षे** वक्ष्यति।

## अथ द्वितीयः पादः

पत्नीं सन्नह्येति यजमानस्य भार्यायाः । (सि) ॥१॥

पत्नीशब्दसामर्थ्यात् मन्त्रवर्णाच्च । (गु) ॥२॥

लिङ्गदर्शनाच्च । (गु) ॥३॥

[1]सर्वासां कर्तृत्वाविशेषात् । (सि) ॥४॥

मन्त्रवर्णाच्च । (गु) ॥५॥

भूयांसि कर्माणि अल्पीयांसो मन्त्रास्तानि[2] सर्वाणि मन्त्रवन्ति[3], तेन मन्यामहे समशः प्रतिविभज्य पूर्वैः पूर्वाणि कुर्यादुत्तरैरुत्तराण्येवं-[4] विषये प्रयुक्तानि यथासमाम्नानं भवन्ति । (सि) ॥६॥

भूयांसो मन्त्रा अल्पीयांसि कर्माणि तत्रैकमन्त्रं[5] कर्माणि कुर्यादविशिष्टा[6] विकल्पार्थो यथा यूपद्रव्याणि । (सि) ॥७॥

ऐन्द्रं पुरोडाशं पयसा प्रदाने कुर्याच्छ्रुतिसंयोगात् । (पू) ॥८॥

नैवमनाम्नानात्[7] । (सि) ॥९॥

समानतन्त्रो वैमृधः[8] पौर्णमास्या पयसा तुल्य[व]च्छ्रूयते । (पू) ॥१०॥

इष्ट्वेत्यपवृज्यभि[वि]धानान्नानातन्त्रं स्यात् । (सि) ॥११॥

दक्षिणाभेदाच्च । (गु) ॥१२॥

---

1. According to *Bh.* this sūtra should have read एवं वा सर्वासां etc. which is taken by him as the *adhikaraṇa-pratīka*.
2. In the sūtra ms., however, स्ता is crossed out and ही is written in its place.
3. *Dev.* adds यथैकेन after this.
4. There is some uncertainty here. The sūtra ms. reads -रुत्तरा···म···वं; *Dev.* reads उत्तरे उत्तराह्येवं.
5. *Dev.* एकं मन्त्रं.
6. Sūtra ms. corrupt; it reads only कुर्यावशिष्टा.
7. Sūtra ms. corrupt; it reads : नवानाम्नानामनानात् .
8. Sūtra ms. actually reads वैत्रधः.

स नित्यो यथाऽन्यान्यङ्गानि । (पू) ॥१३॥

न वा विप्रतिषेधात् । (सि) ॥१४॥

यद्येतानालभेतेत्ये तेन व्याख्यातम् । (सि) ॥१५॥

अग्रशब्दः पौर्णमासीमधिकुरुते तत्र ह्याम्नातः । (पू) ॥१६॥

प्रक्रमवादो वा वैमृधस्यानित्यत्वाद्यथाग्रे कृत्वा नेदानीं करोतीति । (सि) ॥१७॥

[1]न द्वे यजेतेत्यभ्युदितेष्टेः पर्वणश्चानन्तर्यात् । (पू) ॥१८॥

द्विरिज्याया वा न ह्यन्यत् प्रत्यक्षं वचनं विद्यते । (सि) ॥१९॥

यत् पितृभ्यः पूर्वेद्युः[2] करोति पितृभ्य एव तद्यज्ञं निष्क्रीय[3] देवेभ्यः प्रतनुत इति न तन्त्रादौ प्रक्लृप्तत्वात् । (सि) ॥२०॥

उत्तरस्मिन् पर्वणि दृश्यमाने प्रतीयेत सन्निकर्षोऽभिप्रेतः । (सि) ॥२१॥

दक्षिणाग्नौ श्रपणं श्रूयते तस्याहवनीये प्रदानं यथाऽन्यासामाहुतीनाम् । (पू) ॥२२॥

दक्षिणाग्नेरेकोल्मुकं धूपाय धरतीत्येकेषां[4] तत्र प्रदानमर्थवद्धारणं यथा पशावतिप्रणीतस्य । (पू) ॥२३॥

यस्मिन् श्रपयति तस्मिन् जुहोतीति दक्षिणाग्नौ । (सि) ॥२४॥

*अप्यनाहिताग्निना कार्यः पितरश्चिन्मावेदयन्तीति[5] । (सि) ॥२५॥

स लौकिकेऽग्नौ क्रियेत यथान्यानि कर्माणि । (सि) ॥२६॥

---

1. Sūtra ms. corrupt, न येते.
2. Mss. corrupt : *Dev.* भ्यः, sūtra ms. भ्युः; द्युः is restored *Taittirīya Brāhmaṇa*, I. iii. 10, which is quoted here.
3. *Dev.* तदद्य निष्क्रिये.
4. *Dev.* त्येकेष्टयां.
5. Sūtra ms. reads एव in the place of श्चिन् ; the latter restored from the śruti passage quoted in *Bh.* and *Dev.*

तत्र[1] गार्हपत्यस्थानीयमागमयेद् यथा होमार्थे । (पू) ॥२७॥

न वा पृथगस्य संस्कारनिमित्तत्वात् । (सि) ॥२८॥

तत्र गार्हपत्यशब्दो लुप्येत संस्कारसंयोगात् । (सि) ॥२९॥

यत् पौर्णमास्यामग्नीषोमीयं तेनामावास्यायां यजेत कृतलक्षण-ग्रहणात् । (पू) ॥३०॥

अमावास्याऽधि[2]कृता तन्नामधेयं श्रूयते यथा त्रिवृदग्निष्टोम इति स्तोत्राणां[3] संख्याविकारः । (सि) ॥३१॥

अग्नीषोमीयेण यजेत पौर्णमासीमिति नित्यकामो यथैन्द्रवायवे । (सि) ॥३२॥

॥ [ इति ] सङ्कर्षे प्रथमस्य द्वितीयः पादः ॥

## अथ तृतीयः पादः

सर्वाधिकारो विशेषेण श्रूयते । ( पू ) ॥१॥

दोहयोर्वा देवतासामान्यात् । (सि) ॥२॥

*सहकुम्भीभिरभि[4]क्रामन्नाहेति स्रुक्प्रत्याम्नायो यथा पलाशस्य मध्यमेन पर्णेन जुहोतीति । (सि) ॥३॥

लिङ्गाच्च । (गु) ॥४॥

1. *Dev.* यत्र. *Bh.* omits the word.
2. Sūtra ms. has पि for धि which is restored from *Dev.* and *Bh.*
3. *Dev.* सूत्राणां.
4. Sūtra ms. ति for भि.

* Sūtra quoted in the *Adhvara-Mīmāṁsā-Kutūhalavṛtti* (*AMKVṛtti*) of Vāsudeva Dīkṣita (Vani Vilas Press, Srirangam, 1908 ff.). It adds however श्रूयते after -म्नायौ, p. 398.

कर्तृविवृद्धौ होमे प्रदानं प्रतिपात्रविवृद्धिः । (गु) ॥५॥

दोहकाले[1] वार्थपृथक्त्वाद् यथा पुरोडाशविवृद्धौ चतुर्मुष्टिता । (पू) ॥६॥

कुम्भीभिरुत्पन्नाधिकाराश्शेषापनयनार्थो यथा सर्वहुतमेककपालं जुहोतीति । (पू) ॥७॥

*दारुपात्राणि कुम्भीभिर्विकल्पेरन्नेकार्थत्वात् । (आशङ्का) ॥८॥

†प्रवृत्तस्य प्रदानस्य पात्रापनयो यथा पात्नीवतं पर्यग्निकृतमुत्सृजेदिति । (सि) ॥९॥

‡तत्र शेषाः क्रियेरन् पात्रान्यत्वात् । (पू) ॥१०॥

§नापनीतेषु श्रुतत्वात् तद् व्याख्यातम् । (सि) ॥११॥

[2]सन्ततमुच्येत शब्दसंयोगात् । (सि) ॥१२॥

द्विरिज्या पौर्णमास्यास्तयोरुभयोरविशेषणाभ्यासः श्रूयते तेषामेतमर्धमासं प्रसुत [यथा][3] सान्नाय्यम् । (पू) ॥१३॥

उत्तरस्य वा विशेषश्रुतेः । (सि) ॥१४॥

सन्ततं[4] यजेतात्यन्तसंयोगात् । ॥१५॥

सकृद्वा नाभ्यासः श्रूयते । (सि) ॥१६॥

तस्य व्रतं[5] यथा दर्शपूर्णमासयोर्गुणविकारो हि । (पू) ॥१७॥

1. Both *Dev.* and *Bh.* read विवृद्धि in the place of दोहकाले, and दोहकाले is explained in both as understood from the context. In the sūtra ms. reading adopted here, विवृद्धि is to be derived from the previous sūtra.
2. Sūtra ms. has उन्नत for सन्तत; the latter reading restored from *Dev.* and *Bh.*
3. यथा, not in the sūtra ms.; but it is required by the sense of the sūtra.
4. Sūtra ms. reads only सन्त; *Dev.* has a gap here; and *Bh.* reads निरन्तरं. The reading सन्ततं is adopted to suit the sense and the letters in the sūtra ms.
5. Sūtra ms. has an extra द between व्र and तं.

* Sūtra quoted in *AMKVṛtti*, p. 398.
† Sūtra quoted in *AMKVṛtti* with the variant reading पात्रनिधानात् अपनयो, p. 398.
‡ Quoted in *AMKVṛtti* with the variant reading शेषकार्याणि for शेषा:, p. 398.
§ Sūtra quoted in *AMKVṛtti*, p. 398.

अन्तरालभूतं यथा चातुर्मास्येषु । (सि) ॥१८॥

आदिविकल्पो गुणविकाराणम्[1] । (पू) ॥१९॥

तन्त्रविकल्पो वा[2] चोदनार्था यावज्जीवकत्वात्[3] । (सि) ॥२०॥

यूपविरोहणनिमित्तक[4]मुत्तरतत्यर्थं, विप्रतिषेधात् । (सि) ॥२१॥

प्रकृतौ कालविकल्पात् (?विप्रकर्षात्)[5] । (सि) ॥२२॥

तमपरमन्ववधाय[6] यजेतेति समीपवादो यथा नदीमन्ववस्यतीति । (पू) ॥२३॥

द्रव्योपदेशो वा कर्मार्थत्वाद् द्रव्याणाम् । (सि) ॥२४॥

लिङ्गाच्च । (गु) ॥२५॥

सोमे प्रतिषेध[स्त]स्य[7] द्रव्योपदेशात् । (पू) ॥२६॥

सर्व[8]प्रतिषेधो वा विशेषात्[9] । (सि) ॥२७॥

द्रव्योपदेशार्था सोमश्रुतिः । (गु) ॥२८॥

साग्निचित्यानां वादः प्रकरणात् । (पू) ॥२९॥

अनग्निचित्यानां वा यथा विश्वजिति । (सि) ॥३०॥

लिङ्गाच्च । (गु) ॥३१॥

---

1. Sūtra ms. corrupt; it reads गुणापितकरणात् .
2. Sūtra ms. has an extra प्र before चो.
3. *Dev.* जीविकत्वात् ; sūtra ms. जीवतवत् ; क is required to give the correct sense.
4. *Dev.* नैमित्तिक; *Bh.* has only निमित्तक.
5. *Dev.* has विप्रकर्षात् which reads better in the context.
6. Sūtra ms. तं पुनरन्ववसाय. Correct reading restored from the Vedic passage तमपरं etc.
7. Sūtra ms. does not have स्त, but it seems to be necessary.
8. In the sūtra ms. two sūtras from below, 31 and 32, have strayed in after सर्व. There sūtras, of course, occur also in their normal places.
9. Sūtra ms. omits the ending त् .

सोम दर्शपूर्णमासप्रकृतीनां बर्हिर्न विद्यते [1]सौमिकस्तीर्णं[2] भवतिप्रसङ्ग-स्तद्व्याख्यातम् । (सि) ॥३२॥

उक्तन्तु (?उत्तर)[3]स्तीर्णस्योपरि तद्वचनात् । (गु) ॥३३॥

प्लाक्षं सवनीयानां यथा शेषे चतुरवत्तं[4] । (पू) ॥३४॥

अवदानस्तरणार्थं श्रूयते । (सि) ॥३५॥

पशुपुरोडाशार्थमानन्तर्यात् । (पू) ॥३६॥

पुरोडाशार्थं वा यथोत्तरयोरेकशब्देन विधीयते । (पू) ॥३७॥

बर्हिस्तृणीहीति तस्य[5] वादो न ह्यन्यत् प्रत्यक्षं विद्यते । (सि) ॥३८॥

यथाभागं व्यावर्तेथामिति देवतावादः तयोर्भागौ भवतः । (पू) ॥३९॥

पिण्डवादो[6] वा कर्मार्थत्वात् । (सि) ॥४०॥

एतेन विभागलिङ्गा व्याख्याताः । (सि) ॥४१॥

विभक्तयोर्वा देवतोपदेशस्तल्लिङ्गत्वाच्छब्दस्य । (गु) ॥४२॥

अग्नये त्वाग्नीषोमाभ्यामित्येतेन व्याख्यातम् । (गु) ॥४३॥

पुरोडाशगणे व्यावर्तेथामित्येकैकं पिण्डमपच्छिन्द्यात् । (पू) ॥४४॥

व्यावर्तध्वमिति वार्थपृथक्त्वात्तदूहेन व्याख्यातम् । (सि) ॥४५॥

उत्तमयोर्यथासमा[म्नानं][7] विप्रतिषेधात् । (सि) ॥४६॥

सर्वत्र देवतागमः । (पू) ॥४७॥

---

1. Sūtra ms. सा for सौ.
2. Sūtra ms. कं तीर्णं for कस्तीर्णं.
3. Sūtra ms. reads उक्तन्तु; *Dev.* does not have the text of this sūtra; the emendation suggested is in accordance with com. in *Dev.*
4. Sūtra ms. corrupt; it reads चकरपत्तम् .
5. Sūtra ms. reads सन्ततस्य for तस्य. Emendation according to *Dev.* and *Bh.*
6. *Dev.* has विभागो for पिण्डवादो.
7. Sūtra ms. omits म्नानं; it is restored from *Dev.*

उत्तमयोर्वा सन्देहाद् व्यवच्छेदेनेतरे विज्ञायन्ते[1]। (सि) ॥४८॥

चरुपुरोडाशीयाः[2] प्रागधिवपनाद्विभज्येरन् तत्र विभागमन्त्रो निवर्ततेऽन्यकालत्वात्। (पू) ॥४९॥

विद्यते वा हविर्विभागार्थस्तानि विभज्यन्ते यथाऽन्यकालाः प्रयाजाः[3]। (सि) ॥५०॥

एकान्ते चरवस्तथा पुरोडाशास्तद्धर्मा विप्रतिषेधात्। (सि) ॥५१॥

व्यतिषक्तेषु पूर्ववदवच्छेदः[4] क्रमसंयोगात्। (पू) ॥५२॥

युगपद्वा विप्रतिषेधात्। (सि) ॥५३॥

इदममुष्य चामुष्य च देहीत्येकैकमुपलक्षयेत्[5] [सा][6]धारणत्वाद् द्रव्यस्य यथेदममुष्मै[7] चामुष्मै च देहीति। (सि) ॥५४॥

एतेन व्यतिषक्तेषु देवतोपलक्षणं व्याख्यातम्। (सि) ॥५५॥

सर्वपृष्ठायां[8] नाना हवींषि प्रदाने विभज्यन्ते तत्र[9] विभागमन्त्रः क्रियते यथा चरुपुरोडाशेषु। (पू) ॥५६॥

न हविर्विभागार्थः, प्रदानं [10][पुन]रेतत् क्रियते। (सि) ॥५७॥

॥ [इति] सङ्कर्षे प्रथमस्य तृतीयः पादः ॥

---

1. Sūtra ms. corrupt; it reads पन्ते for यन्ते.
2. *Dev.* डाशात्, wrong; *Bh.* डाशाः.
3. *Dev.* reads the sūtra as : विद्यते विभागमन्त्रः हविर्भागार्थत्वाद्विभज्यन्ते ।
4. *Dev.* reads पूर्वावच्छेदः.
5. *Dev.* reads लक्षणयोः.
6. सा missing in sūtra ms. It is required in the context.
7. Sūtra ms. ष्यै; one *Dev.* ms. has also ष्यै.
8. *Dev.* reads सर्वप्रतिष्ठायां.
9. *Dev.* reads अत्र for तत्र.
10. पुनः is missing in the sūtra ms.; it is restored from *Dev.*

## अथ चतुर्थः पादः

कर्मचोदना वाजिनस्य यथाऽऽमिक्षायागः । ( पू ) ॥१॥

अप्रयोजनकं वाजिनं यथा फलीकरणहोमः[1] । (सि) ॥२॥

वाजिनेनाव[2]सिञ्चेदित्यन्यदागमयेद्वाजिभ्यस्तदनुपदिष्टम्[3] । (पू ) ॥३॥

उत्पन्नाधिकारो वा[4] वाजिनस्य प्रकृतं विभज्यते[5] यथा ध्रौवम् । (सि) ॥४॥

आमीक्षायां स्विष्टकृन्न विद्यते वाजिनस्य स्यात् प्रत्यामनेद्[6] यथा त्र्यङ्गानि । ( पू ) ॥५॥

नाना कर्मणि भवतः तद्व्याख्यातम् । (सि) ॥६॥

तस्य वाजिनं निरवदानं यथाऽन्येषां हविषाम् । ( पू ) ॥७॥

अनुवषट्करोतीति अनुर्विप्रकर्षे[7] नोपपद्यते । (सि) ॥८॥

लिङ्गाच्च । (गु) ॥९॥

विशाखत्वं धर्ममात्रं यथा श्लक्ष्णाग्रता[8] । ( पू ) ॥१०॥

नियोजनं वाऽर्थवत्त्वाद् यथा वरुणप्रघासेषु । (सि) ॥११॥

एतेन यूपकर्म व्याख्यातं तत्संयोगाद्धर्माणाम् । (सि) ॥१२॥

ऊर्ध्वं नाभिदघ्नाद्विशाखं यथा[9]तन्त्रं रशना[10] । ( पू ) ॥१३॥

---

1. *Dev.* फलकरणहोमम् for फलीकरणहोमः.
2. *Bh.* reads नोप for नाव.
3. Sūtra ms. reads तदुपदिष्टम् . Emendation acc. to *Dev.*
4. *Dev.* वा omitted.
5. *Dev.* reads प्रविभज्यते for प्रकृतं विभज्यते.
6. Sūtra ms. reads प्रत्यामनाद् . Emendation acc. to *Bh.* and *Dev.*
7. *Dev.* reads करोतीत्यत्र विप्रकर्षे.
8. Sūtra ms. corrupt, ग्रह: for ग्रता.
9. Sūtra ms. तथा.
10. Sūtra ms. corrupt, रशरशना.

अधस्ताद्वा प्रकृत्युपबन्धात्। (सि) ॥१४॥

अग्रमध्यशब्दौ सन्नह्येतामग्रमध्यपृथक्त्वात्। (सि) ॥१५॥

सहोपरं प्रमाणम्। (पू) ॥१६॥

यजमानेन[1] सम्मितौदुम्बरी भवतीत्येतेन व्याख्यातम्। (पू) ॥१७॥

ऊर्ध्वं वा निखातादर्थे श्रूयते यथा पौरुषः प्रकार इति। (सि) ॥१८॥

नाभिदघ्ने[2] परिव्ययतीत्येतेन व्याख्यातम्। (सि) ॥१९॥

यजमानेन यूपस्सम्मित इति विधानात् परिमाणानां यजमानेन सम्मानम्। (सि) ॥२०॥

अध्वर्योः प्रमाणं प्रकरणात्[3]। (पू) ॥२१॥

याथाकामी वा प्रयुक्तं शूर्पम्। (सि) ॥२२॥

चतुरो मुष्टीर्निर्वपतीत्येतेन व्याख्यातम्। (पू) ॥२३॥

अध्वर्योः[4] कर्मलक्षणत्वान्मुष्टेर्यथा मुष्टिमाद्दत्स्वेति[5]। (सि) ॥२४॥

परिवीय [वासयतीति][6] वासमात्रं शब्दसंयोगात्। (पू) ॥२५॥

अर्थे[7]कर्म वा कर्मशब्देन विधीयते यथा परिधौ पशुं नियुञ्जीतेति[8]। (सि) ॥२६॥

तासामेकां नाभिदघ्ने परिवीय यथावकाशमितर[9]विप्रतिषेधात्। (पू) ॥२७॥

युगपद्वा विप्रतिषेधात्। (सि) ॥२८॥

---

1. Sūtra ms. यजमान for यजमानेन.
2. *Bh*: नभिदघ्नं.
3. *Dev*. प्रमाणात्, corrupt.
4. *Dev*. adds here वा.
5. Sūtra ms. corrupt, मुष्टिमादथेसिव.
6. वासयतीति, required in the context, is restored from *Dev*.
7. *Dev*. अर्थाः for अर्थे.
8. Sūtra ms. नियुजन्तीति. Emendation according to *Bh*: *Dev*. reads नियुञ्जेतेति.
9. Sūtra ms. मितरो.

एतेनैकादशिन्यां[1] द्वैरशन्यं व्याख्यातम् । (सि) ॥२९॥

[स्थितादुत्तरं][2] विशेषेण वाग्निष्ठस्य रशने तयोरुपादानार्थो न विद्यते प्रमोक्षः पुनर्युगपद्भावे स्यात्[3] । (सि) ॥३०॥

तन्त्रं यूपमन्त्रो यूपाभिधानमभिप्रेतम् । (सि) ॥३१॥

[आद्यस्थितादुत्तरं][4] वासमात्रं वै तत् स्याद्वासयत्यग्निष्ठ इत्यर्थकर्मण्यनर्थकं स्यात् । (सि) ॥३२॥

लिङ्गाच्च । (गु) ॥३३॥

ऐकादशिनान् प्रतिषिध्य विधीयते । (सि) ॥३४॥

तेषां वैकसंख्याप्रतिषेधः श्रूयते यथैकां सामिधेनीमन्वाहेति । ( पू ) ॥३५॥

लिङ्गाच्च । (गु) ॥३६॥

तेषां पूर्वेद्युस्सम्मानं यथा प्रकृतौ । (गु) ॥३७॥

सद्यो वा प्रकृतावर्थलक्षणत्वाद्यथाऽस्य पशौ विभागः[5] । (सि) ॥३८॥

एके विधीयते तदहर्गणे तन्त्रं स्यात् । (सि) ॥३९॥

सद्यस्सम्मानमभ्यावर्ततार्थलक्षणत्वाद् यथाऽऽहवनीयसम्मानम्[6] । (सि) ॥४०॥

एतेन सवनीयरशना व्याख्याताः । (सि) ॥४१॥

तन्त्रं वा साधारणत्वात् छेदनस्य यथा प्रकृतौ तस्य कालोत्कर्षः । (सि) ॥४२॥

अग्रेणाहवनीयं प्राञ्चः समीयेरन् दिक्संयोगात् । ( पू ) ॥४३॥

उदञ्चो वार्थमन्त्रवैयर्थ्यं बहिर्वेदीति विज्ञायते । (सि) ॥४४॥

लिङ्गाच्च । (गु) ॥४५॥

---

1. Sūtra ms. reads only न्या; the anusvāra is required for the sense.
2. स्थितादुत्तरं not available in the sūtra ms.; it is restored from *Bh.*; *Dev.* reads स्थितं तावदुत्तरं.
3. Sūtra ms. corrupt; it reads पुनर्युगपद्भाक् . Emendation from *Dev.*
4. Sūtra ms. does not have the word; it is available in *Bh.*; *Dev.* reads corruptly आद्याब्धितादुत्तरं.
5. Sūtra ms. writes here the 37th sūtra again, but indicates the elision only of the latter part of it, probably by oversight.
6. *Bh.* and *Dev.* read सम्मार्जनम् .

तेषामन्तराले याथाकामि न नियमः श्रूयते। (पू) ॥४६॥

न विकल्पो विप्रतिषेधात्। (सि) ॥४७॥

[1][तथा वेदिसम्मितान्मिनोतीति]। (पू) ॥४८॥

यथापूर्वमग्निष्ठदेशमीप्सेयुर्मुख्यस्वाधर्म्यात्। (पू) ॥४९॥

लिङ्गाच्च। (गु) ॥५०॥

उदगपवर्गा यूपा भवन्ति, प्रागपवर्गाः[2] पशव[3], एतेषां पौर्वापर्यविधिस्ते[न][4] मन्यामहे द्वावुत्तमौ दक्षिणोत्तरार्धौ मिनुयादेवं भूयिष्ठा यथासमाम्नानं[5] भवन्ति। (सि) ॥५१॥

उपरसम्मितां मिनुयात् पितृलोक[6]कामस्य, मध्येन सम्मितां रशनम्मितां च मनुष्यलोककामस्य[7], चषालसम्मितां इन्द्रियकामस्येत्यायामत उपराणि सामान्यानि[8] स्युस्तिर्यक्त्वो मध्या[9] निरशनाश्च प्रथिम्नश्च[10]षालान्येवमथोक्तानि भवन्ति। (सि) ॥५२॥

तामेतामतिरात्रचरम आलभेतेति [11]व्यत्यस्तपशोर्वादः सन्निधानात्। (पू) ॥५३॥

येयमितरा यामिमां प्रजा आपद्य चरन्तीति प्रसृतपशोर्वादो व्यपदेशात्।[12] (सि) ॥५४॥

॥ [इति] सङ्कर्षे प्रथमस्य चतुर्थः पादः ॥

---

1. Sūtra ms. doest not have this sūtra, but it is found both in *Dev.* and *Bh.*
2. *Dev.* दक्षिणापवर्गाः.
3. *Dev.* adds here इति
4. न is taken from *Dev.*; the sūtra ms. does not have it.
5. *Dev.* reads ना for नं.
6. Sūtra ms. has a gap in the place of क.
7. *Dev.* has an extra च here.
8. *Dev.* समानि for सामान्यानि.
9. *Dev.* मध्यानि for मध्या.
10. In sūtra ms. ष is left out.
11. *Bh.* takes व्यत्यस्तपशु as the *adhikaraṇa-pratīka.*
12. In *Dev.* this sūtra seems to be read as: येयमितरा यामिमां प्रजा आपद्य चरन्तीति अक्षादिवैतदैवान्यानि भवन्तीति प्रस्त(?)पशोर्वादो व्यपदेशात् प्रसृतपशोरेष वादस्सन्धिः।

## अथ द्वितीयाध्याये प्रथमः पादः

इष्टकाभिरग्निं चिनुत इति मृण्मयस्थण्डिलकर्मणि श्रूयते[1] यथा लोके।
(स्वि) ॥१॥[2]

* * * * * * * *

1. Sūtra ms. श्रूयन्ते.

2. The sūtra ms. stops abruptly with this in the middle of the obverse of folio 21. The reason might be that the archetype of the sūtra ms. extended only thus far.